# ॥ वाल्मीकि रामायण ॥

## ६ युद्धकाण्ड

### अध्याय २२

ततस्तमक्षोभ्यबलं लङ्कायां नृपतेश्वरः ।
सुवेले राघवं शैले निविष्टं प्रत्यवेदयन् ॥ १ ॥

चाराणां रावणः श्रुत्वा प्राप्तं रामं महाबलम् ।
जातोद्वेगोऽभवत्किं चित्सचिवांश्चेदमब्रवीत् ॥ २ ॥

मन्त्रिणः शीघ्रमायान्तु सर्वे वै सुसमाहिताः ।
अयं नो मन्त्रकालो हि सम्प्राप्त इव राक्षसाः ॥ ३ ॥

तस्य तच्छासनं श्रुत्वा मन्त्रिणोऽभ्यागमन्द्रुतम् ।
ततः संमन्त्रयामास सचिवै राक्षसैः सह ॥ ४ ॥

मन्त्रयित्वा स दुर्धर्षः क्षमं यत्समनन्तरम् ।
विसर्जयित्वा सचिवान्प्रविवेश स्वमालयम् ॥ ५ ॥

ततो राक्षसमाहूय विद्युज्जिह्वं महाबलम् ।
मायाविदं महामायः प्राविशद्यत्र मैथिली ॥ ६ ॥

विद्युज्जिह्वं च मायाज्ञमब्रवीद्राक्षसाधिपः ।
मोहयिष्यामहे सीतां मायया जनकात्मजाम् ॥ ७ ॥

शिरो मायामयं गृह्य राघवस्य निशाचर ।
मां त्वं समुपतिष्ठस्व महच्च सशरं धनुः ॥ ८ ॥

एवमुक्तस्तथेत्याह विद्युज्जिह्वो निशाचरः ।
तस्य तुष्टोऽभवद्राजा प्रददौ च विभूषणम् ॥ ९ ॥

अशोकवनिकायां तु प्रविवेश महाबलः ।
ततो दीनामदैन्यार्हां ददर्श धनदानुजः ।
अधोमुखीं शोकपरामुपविष्टां महीतले ॥ १० ॥

भर्तारमेव ध्यायन्तीमशोकवनिकां गताम् ।
उपास्यमानां घोराभी राक्षसीभिरदूरतः ॥ ११ ॥

उपसृत्य ततः सीतां प्रहर्षन्नाम कीर्तयन् ।
इदं च वचनं धृष्टमुवाच जनकात्मजाम् ॥ १२ ॥

सान्त्व्यमाना मया भद्रे यमुपाश्रित्य वल्गसे ।
खर हन्ता स ते भर्ता राघवः समरे हतः ॥ १३ ॥

छिन्नं ते सर्वतो मूलं दर्पस्ते निहतो मया ।
व्यसनेनात्मनः सीते मम भार्या भविष्यसि ॥ १४ ॥

अल्पपुण्ये निवृत्तार्थे मूढे पण्डितमानिनि ।
शृणु भर्तृबधं सीते घोरं वृत्रवधं यथा ॥ १५ ॥

समायातः समुद्रान्तं मां हन्तुं किल राघवः ।
वानरेन्द्रप्रणीतेन बलेन महता वृतः ॥ १६ ॥

संनिविष्टः समुद्रस्य तीरमासाद्य दक्षिणम् ।
बलेन महता रामो व्रजत्यस्तं दिवाकरे ॥ १७ ॥

अथाध्वनि परिश्रान्तमर्धरात्रे स्थितं बलम् ।
सुखसुप्तं समासाद्य चारितं प्रथमं चरैः ॥ १८ ॥

तत्प्रहस्तप्रणीतेन बलेन महता मम ।
बलमस्य हतं रात्रौ यत्र रामः सुलक्ष्मणः ॥ १९ ॥

पट्टसान्परिघान्खड्गांश्चक्रान्दण्डान्महायसान् ।
बाणजालानि शूलानि भास्वरान्कूटमुद्गरान् ॥ २० ॥

यष्टीश्च तोमरान्प्रासंश्चक्राणि मुसलानि च ।
उद्यम्योद्यम्य रक्षोभिर्वानरेषु निपातिताः ॥ २१ ॥

अथ सुप्तस्य रामस्य प्रहस्तेन प्रमाथिना ।
असक्तं कृतहस्तेन शिरश्छिन्नं महासिना ॥ २२ ॥

विभीषणः समुत्पत्य निगृहीतो यदृच्छया ।
दिशः प्रव्राजितः सर्वैर्लक्ष्मणः प्लवगैः सह ॥ २३ ॥

सुग्रीवो ग्रीवया शेते भग्नया प्लवगाधिपः ।
निरस्तहनुकः शेते हनूमान्राक्षसैर्हतः ॥ २४ ॥

जाम्बवानथ जानुभ्याम् उत्पतन्निहतो युधि ।
पट्टसैर्बहुभिश्छिन्नो निकृत्तः पादपो यथा ॥ २५ ॥

मैन्दश्च द्विविदश्चोभौ निहतौ वानरर्षभौ ।

निःश्वसन्तौ रुदन्तौ च रुधिरेण समुक्षितौ ॥ २६ ॥

असिनाभ्याहतश्छिन्नो मध्ये रिपुनिषूदनः ।
अभिष्टनति मेदिन्यां पनसः पनसो यथा ॥ २७ ॥

नाराचैर्बहुभिश्छिन्नः शेते दर्यां दरीमुखः ।
कुमुदस्तु महातेजा निष्कूजन्सायकैर्हतः ॥ २८ ॥

अङ्गदो बहुभिश्छिन्नः शरैरासाद्य राक्षसैः ।
पातितो रुधिरोद्गारी क्षितौ निपतितोऽङ्गदः ॥ २९ ॥

हरयो मथिता नागै रथजालैस्तथापरे ।
शायिता मृदितास्तत्र वायुवेगैरिवाम्बुदाः ॥ ३० ॥

प्रद्रुताश्च परे त्रस्ता हन्यमाना जघन्यतः ।
अभिद्रुतास्तु रक्षोभिः सिंहैरिव महाद्विपाः ॥ ३१ ॥

सागरे पतिताः के चित्के चिद्गगनमाश्रिताः ।
ऋक्षा वृक्षानुपारूढा वानरैस्तु विमिश्रिताः ॥ ३२ ॥

सागरस्य च तीरेषु शैलेषु च वनेषु च ।
पिङ्गाक्षास्ते विरूपाक्षैर्बहुभिर्बहवो हताः ॥ ३३ ॥

एवं तव हतो भर्ता ससैन्यो मम सेनया ।
क्षतजार्द्रं रजोध्वस्तमिदं चास्याहृतं शिरः ॥ ३४ ॥

ततः परमदुर्धर्षो रावणो राक्षसेश्वरः ।
सीतायामुपशृण्वन्त्यां राक्षसीमिदमब्रवीत् ॥ ३५ ॥

राक्षसं क्रूरकर्माणं विद्युज्जिह्वं त्वमानय ।
येन तद्राघवशिरः सङ्ग्रामात्स्वयमाहृतम् ॥ ३६ ॥

विद्युज्जिह्वस्ततो गृह्य शिरस्तत्सशरासनम् ।
प्रणामं शिरसा कृत्वा रावणस्याग्रतः स्थितः ॥ ३७ ॥

तमब्रवीत्ततो राजा रावणो राक्षसं स्थितम् ।
विद्युज्जिह्वं महाजिह्वं समीपपरिवर्तिनम् ॥ ३८ ॥

अग्रतः कुरु सीतायाः शीघ्रं दाशरथेः शिरः ।
अवस्थां पश्चिमां भर्तुः कृपणा साधु पश्यतु ॥ ३९ ॥

एवमुक्तं तु तद्रक्षः शिरस्तत्प्रियदर्शनम् ।
उपनिक्षिप्य सीतायाः क्षिप्रमन्तरधीयत ॥ ४० ॥

रावणश्चापि चिक्षेप भास्वरं कार्मुकं महत् ।
त्रिषु लोकेषु विख्यातं सीतामिदमुवाच ह ॥ ४१ ॥

इदं तत्तव रामस्य कार्मुकं ज्यासमन्वितम् ।
इह प्रहस्तेनानीतं हत्वा तं निशि मानुषम् ॥ ४२ ॥

स विद्युज्जिह्वेन सहैव तच्छिरो
धनुश्च भूमौ विनिकीर्य रावणः ।
विदेहराजस्य सुतां यशस्विनीं
ततोऽब्रवीत्तां भव मे वशानुगा ॥ ४३ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com